**दिनाङ्कः : 02/11/2024** **सायम् : 06:20**

## इयम् आकाशवाणी

## आदौ-मुख्यवार्ताः

- भारतं ग्रीसश्च स्वीययोः रणनीति-संबन्धं दृढीकर्तुं प्रतिबद्धतां पुनः स्मारितवन्तौ। व्यापारः, रक्षणम्, नौकावहनम्, सम्पर्कः इत्यादिषु विविधेषु क्षेत्रेषु प्रगतेः समीक्षां कृतवन्तौ।
- विदेशमन्त्रालय ह्यः कनाडा उच्चायोगस्य प्रतिनिधिं आहूय उपमन्त्रिणा डेविड् मॉरिसन इत्यनेन सह जनसुरक्षाराष्ट्रसुरक्षास्थायिसमित्ये समक्षं गृहमन्त्रिणः अमितशाहस्य सन्दर्भाणां विषये भारतस्य विरोधं प्रदर्शित।
- भारतस्य चतुर्दिवसीय यात्रायां समागतेन थाईलैण्डस्य विदेशमन्त्रिणा सह अद्य नवदिल्ल्यां विदेशमन्त्री डॉ० एस् जयशङ्करः मेलनं कृतवान्।
- कश्मीरोत्पत्यकायां अनन्तनागे जनपदे सुरक्षा-बलैः सह संघर्षे द्वौ आतंकिनौ हतौ।
- अशेषे देशे गोवर्धन पूजनम् अमान्यते। अन्नकूटस्य अवसरे अद्य उत्तराखण्डस्य चतुर्षु धामसु एकस्य गङ्गोत्री धामस्य कपाटः शीतकालाय पिहितः।
- भारतीय कृषा वर्मा गत दिवसे अमेरिकायाः, कोलोराडो इत्यत्र ऊनविंशति-वयसयन्तगर्तं विश्व-मुष्टिका-स्पर्धायां स्वर्ण-पदकं विजितवती।

## अथ वार्ताः

### भारत-ग्रीस - HL-1

भारतस्य प्रधानमन्त्री नरेन्द्र मोदी ग्रीसस्य प्रधानमन्त्री किरियाकोस मित्सोताकिसश्च द्वयोः देशयोः मध्ये रणनीतिकसंबन्धं प्रबलं कर्तुं स्वप्रतिबद्धतां पुनरुक्त वन्तौ। दूरवाणी-संवादस्य माध्यमेन उभौ नेतारौ भारत-मध्य-पूर्व यूरोप- आर्थिक- विषये च पश्चिम एशियायाम् विकासेन च सह विभिन्न-क्षेत्रीयाणाम् वैश्विक- समस्याम् च विषये चर्चां कृतवन्तौ। तौ व्यापार- रक्षा-नौकावहन- सम्पर्क - इत्यादिषु द्विपक्षीयसहयोगानाम् अनेकेषु क्षेत्रेषु प्रगतेः समीक्षां कृतवन्तौ। संवादे, श्री मित्सोताकिसः भारते निर्वाचने पुनर्निर्वाचिते सति श्रीमोदिने वर्धापनानि प्रेषितवान्।

## विदेशमंत्रालय-कनाडा - HL-2

विदेशमन्त्रालये ह्यः कनाडा उच्चायोगस्य प्रतिनिधिं आहूय उपमन्त्रिणा डेविड् मॉरिसन इत्यनेन सह जनसुरक्षाराष्ट्रसुरक्षास्थायिसमित्याः समक्षं गृहमन्त्रिणः अमितशाहस्य सन्दर्भाणां विषये भारतस्य विरोधः प्रदर्शितः। अद्य अपराह्ने नवदिल्ल्यां वार्ताहरान् संबोधयन् मन्त्रालयस्य प्रवक्ता रणधीरजायसवालः अवदत् यत् ओटावानगरे स्थायिसमितेः कार्याचरणसम्बद्धं कूटनीतिकपत्रम् अक्टूबर् मासस्य ऊनत्रिंशत दिनाङ्के समर्पितं। सः उक्तवान् यत् कनाडादेशस्य उच्चाधिकारिणः अन्तर्राष्ट्रीय प्रवहिकासु निराधार-आक्षेपान् प्रसारयन्ति इति प्रकाशनं वर्तमान-कनाडा-सर्वकारस्य राजनैतिक-कार्यक्रमस्य व्यवहार-प्रकारस्य च विषये भारतस्य दृष्टिकोणं पुष्टिं करोति। एतादृशैः कार्यैः द्विपक्षीयसम्बन्धानां कृते गम्भीराः परिणामाः भविष्यन्ति इति सः सावधानं कृतवान्। कनाडादेशेन भारतीयाधिकारिषु कृतस्य निरीक्षणस्य विषये श्रीजयसवालः अवदत् यत् भारतस्य केषाञ्चन वाणिज्यदूतावासाधिकारिणः अद्यापि कनाडासर्वकारस्य श्रव्य-दृश्य- निरीक्षणाधीनाः सन्ति।

## जयशंकर – मेलनं - HL-3

भारतस्य चतुर्दिवसीय यात्रायां समागतेन थाईलैण्डस्य विदेशमन्त्रिणा मैरिस सांगियाम्पोगसा इत्यनेन सह अद्य नवदिल्ल्यां विदेशमन्त्री डॉ० एस् जयशङ्करः मेलनं कृतवान्। जनसम्पर्क-पटले जयशंकर-प्रोक्तवान् यत् रॉयल कथिना-समारोहाय थाईलैण्डस्य विदेशमन्त्री उभयोः देशयो मध्ये प्रचलतां ऐतिहासिक-सांस्कृतिक-संबंधानाम् उदाहरणम् अस्ति।

## जयशंकर-ऑस्ट्रेलिया सिंगापुर :

विदेशमंत्री डॉ.एस जयशङ्करः श्वः आरभ्य आस्ट्रेलिया सिंगापुर देशयोः षड् दिवसीय यात्रायां भविष्यति। विदेशमन्त्री डॉ.एस जयशङ्करः ब्रिस्बेन्-नगरं सम्प्राप्य आस्ट्रेलिया-देशे भारतस्य चतुर्थ-वाणिज्यदूतावासस्य उद्घाटनं करिष्यति। सः कैनबरानगरे स्वस्य आस्ट्रेलियादेशीय समकक्षेण पेनी वोङ्ग् इत्यनेन सह पञ्चदशतमे विदेशमन्त्रिरूपरेखासंवादस्य सहअध्यक्षः अपि भविष्यति। विदेशमन्त्री आस्ट्रेलियादेशस्य संसदभवने आयोजितस्य द्वितीयस्य रैसिना डाउन अण्डर इत्यस्य उद्घाटनसत्रे मुख्यभाषणं प्रदास्यति।

**विरामः**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

**अनन्तनाग-आतंकी - HL-4**

कश्मीरोत्पत्यकायां अनन्तनाग-जनपदे हलकन-मार्गिका क्षेत्रे अद्य मध्याह्ने सुरक्षा-बलैः सह जाते संघर्षे द्वौ आतंकिनौ हतौ। श्रीनगरे स्थितस्य चिनार-कोरस्य जनसम्पर्क-पटलानुसारेण क्षेत्रे केषा ञ्चित् आतंकिनां वर्तमान प्राप्त सूचनानन्तरं आरक्षि-बलैः, सुरक्षा बलैश्च क्रियान्वयनं प्रारब्धम्। अपरत्र श्रीनगर-नगरस्य खन्यार-क्षेत्रे सुरक्षा-बलानां आतंकिनां च मध्ये गोलिका प्रहाराः अभूवन् ।

**उत्तराखण्ड-चारधाम : - HL-5**

अशेषे देशे गोवर्धन पूजनम् अमान्यते। उत्तराखण्ड-चारधामः उत्तरकाश्याम् अन्नकूटस्य अवसरे अद्य उत्तराखण्डस्य चतुर्षु धामसु एकस्य गङ्गोत्री धाम्नः कपाटः शीतकालाय पिहितः। अद्य रात्रौ चतुर्दशनिमेषाधिक द्वादश वादने शुभ-अभिजीत-मुहूर्त-समये विशाल भक्तानां समूहस्य उपस्थितौ मन्दिरस्य द्वाराणि औपचारिकरूपेण पिधास्यन्ते। अस्मिन् अवसरे मन्दिरं विविधपुष्पैः अलङ्कृयते। अस्मिन् वर्षे एतावता अष्टलक्षाधिकाः तीर्थयात्रिणः उत्तरकाशीमण्डलस्य गङ्गोत्रीधामस्य यात्रां कृतवन्तः। सहैव रुद्रप्रयागस्य केदारनाथधाम्नः, उत्तरकाशी यमुनोत्रीधाम्नः च द्वाराणि पिधातुं सज्जतापि समारब्धा। श्वः भर्तृ द्वितीयायाः-दिने द्वयोः धाम्नोः द्वाराणि पिहितौ भविष्यतः। रुद्रप्रयागमण्डले बाबाकेदारस्य दर्शनार्थं बहुशः दर्शनार्थिनः निरन्तरं गच्छन्ति।

**षष्ठी**

षष्ठी-पूजनस्यावसरे यात्रिणां सौविध्याय विशेष-रेलयानानि प्रचाल्यन्ते। राष्ट्रिय-राजधान्यां आनन्द-बिहार-नई-दिल्ली, निजामुद्दीन-रेल-स्थानेभ्यः विशेष-रेलयानानि संचाल्येन्ता उत्तर-रेलविभागस्य मुख्यः जनसंपर्क-अधिकारी हिमांशु-शेखर-उपाध्यायः आकशवाण्याः संवादं प्रोक्तवान् यत् उत्सवान् निधाय उत्तर-रेलविभागेन दिल्ल्याः प्रमुखेभ्यः रेलस्थानेभ्यः विशेष-रेलयानानि चाल्यन्ते।

**प्रधानमन्त्री नरेन्द्र-मोदी गुजरात**

प्रधानमन्त्री नरेन्द्र-मोदी गुजरात- नववर्षे अवसरं शुभकामनाः च प्रदत्तवान्। जनसम्पर्क- मीडिया- इत्यत्र श्री मोदिना कामना कृता यत् नववर्षः जनानां जीवने सुखं, सफलतां समृद्धिं च आनयेत्।

**रेलमन्त्री**

रेल-मन्त्री अश्विनी वैष्णव: गतसायं नवदिल्ल्यां रेलस्थात्रस्य यात्रां कृतवान् यत्र असौ उत्सवसमये यात्रिणां कृते विशेष-सैविध्यानां व्यवस्थानां च समीक्षां कृतवान्।

**भारतं कृषि**

भारतं कृषिप्रधानदेशः अस्ति। अतः उत्सवोयं गोमात्रा सह सम्बद्धः।

**अंताराष्ट्रीय – जिनेवा**

अंताराष्ट्रीय -श्रम संघटनस्य शासकीय- निकायस्य द्विपञ्चाशत् उत्तर त्रिशततममुपवेशनम् जिनेवा नगरे आयोज्यते।

**विश्व-मुष्टिका-स्पर्धायां - HL-6**

भारतीय कृषा वर्मा गत दिवसे अमेरिकाया:, कोलोराडो इत्यत्र ऊनविंशति-वयस्यन्तर्गतं विश्व- मुष्टिका-स्पर्धायां स्वर्ण-पदकं विजितवती।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

।।इति वार्ता:।।